# तद्धितेषु सम्बन्धार्थकाः

# तद्धित → तस्मै हितः

**सरल-प्रयोगाय यः हितं करोति** सः तद्धितः इति उच्यते।

◌ः

## केचन तद्धित-प्रभेदाः

- ✓ अपत्यार्थका ◌ः
- ✓ मत्वर्थीया ◌ः
- ✓ भावार्थकाः
- सम्बन्धार्थकाः
  - अण्
  - छः
  - ठक्
  - छस्

s2s

# सम्बन्धार्थकाः

→ सम्बन्ध-बोधकाः

→ "“तस्य इदम् ” इति बोधकाः

उदा → ऐरावतः ऐन्द्रः ा:) गजः अस्ति।

वयं भारतीयाः :) संस्कृतं पठामः।

ते वैष्णवा ा:) तिरुपतिमन्दिरं गच्छन्ति।

ः

## “**तस्य इदम्**” इत्यर्थे विधीयमानाः प्रत्ययाः

| | | |
|---|---|---|
| **अण्** | मित्रस्य अयं | **मैत्रः/ मैत्री/ मैत्रम्** |
| **छः** | शालायाः इदम् | **शालीयम्** |
| **ठञ्** | देहस्य इयम् | **दैहिकी / दैहिकः / दैहिकम्** |
| **घः**(इय) | राष्ट्रस्य इदम् | **राष्ट्रियम्** |
| **यः** | ग्रामस्य अयम् | **ग्राम्यः** |
| **खञ्** (ईन) | ग्रामस्य अयम् | **ग्रामीणः** |

s2s s2s s2s s2s s2s s2s s2s

# छः

## ( ईय )

“तस्य इदम्” इत्यर्थे वृद्ध-संज्ञकेभ्यः **छ**-प्रत्ययः भवति, अण् अपि भवति।

**सम्बन्धार्थकः - ईय् (ईय्)**

**वृद्धसंज्ञकाः**
1- येषाम् आद्यः अच् वृद्धिः, ते।
2- त्यद्, तद्, यद्, एतद्, इदम्, अदस्, एक द्वि, युष्मद्, अस्मद्, भवत्, किम्।
3- नामधेय-शब्दाः

**प्रातिपदिकम् + ईय् = तद्धितप्रातिपदिकम्**

| | | | | | |
|---|---|---|---|---|---|
| शालायाः इदम् | → | शाला | + छः | → | शालीयम् |
| आत्मनः अयम् | → | आत्मन् | + छः | → | आत्मीयः |
| पाणिनेः इयम् | → | पाणिनि | + छः | → | पाणिनीया |
| तस्य इदम् | → | तद् | + छः | → | तदीयम् |
| अस्य इदम् | → | इदम् | + छः | → | इदमीयम् |
| अमुष्य इदम् | → | अदस् | + छः | → | अदसीयम् |
| देवदत्तस्य इदम् | → | देवदत्त | + छः | → | देवदत्तीयम् |
| सुशान्तस्य अयम् | → | सुशान्तः | + छः | → | सौशान्तीयः |
| माधवस्य इयम् | → | माधव | + छः | → | माधवीया |

# ठक्-छस्

## (क) (ईय)

s2s s2s s2s s s2s s2s s2s

## सम्बन्धार्थकप्रत्ययेषु विशिष्टस्थलानि -

1) **भवतष्ठक्छसौ** - सर्वनाम-भवत्-शब्दात् **ठक्-छस्-प्रत्ययौ** भवतः।

ठक् (क) = भावत्कः

छस् (ईय) = भवदीयः

2) **राज्ञः क च** - राजन्-शब्दात् छ-प्रत्ययः, **न्** इत्यस्य **क्**-आदेशः च भवति।

राजकीयम्

3) **पर्वताच्च** - पर्वत-शब्दात् मनुष्यसन्दर्भे **छ-**प्रत्ययः भवति।

अन्येषु **छ-अणौ** भवतः।

पर्वतीयः मनुष्यः

पर्वतीयम् / पार्वतं पुष्पम्

s2s

## सम्बन्धार्थकप्रत्ययेषु विशिष्टस्थलानि -

s2s s2s s2s s2s

4) **काश्यादिगणपठितेभ्यः** "तस्य इदम्" इत्यर्थे **ठञ्-ञिठ-प्रत्ययौ** भवतः।

**काश्यादिगणः** -काशि। चेदि। संज्ञा। संवाह। अच्युत। मोहमान। शकुलाद। हस्तिकर्षू। कुदामन्।
हिरण्य। करण। गोधाशन। भौरिकि। भौलिङ्गि। अरिन्दम। सर्वमित्र। देवदत्त। साधुमित्र।
दासमित्र।
दासग्राम। सौधावतान। युवराज। उपराज। सिन्धुमित्र। देवराज। आपदादिपूर्वपदात् कालात्।

**ठञ्** (इक/क)
(उगन्त-तकारान्त-प्रातिपदिकेषु **ठस्य** "कः" भवति अन्यत्र **इकः** भवति।)
स्त्रियां ङीप्(ई) भवति।

**ञिठः** - ठ(इक/क) - **ञ्, इ-** द्वयोरपि लोपः।
(**उ**कारान्त-**त**कारान्त-प्रातिपदिकेषु **ठस्य** "**कः**" भवति अन्यत्र **इकः** भवति।)

**स्त्रियां टाप्(आ) भवति।**

युष्मद्-अस्मद्-शब्दाभ्यां सम्बन्धार्थ-प्रत्ययाः, तत्र प्रक्रिया च

युष्मद्-अस्मद्-शब्दाभ्यां "**तस्य इदम्**" इत्यर्थे अण्-छ-खञ्-प्रत्ययाः भवन्ति।

1) अण्-खञ्-प्रत्यययोः **एक**वचने

**युष्मद्**-शब्दस्य **तवक**-आदेशः
**अस्मद्**-शब्दस्य **ममक**-आदेशः

**तव अयम्** = तावकः/ तावकीनः
**मम अयम्** = मामकः/ मामकीनः

2 ) **अण्-खञ्**-प्रत्यययोः **द्वि-बहु**वचनयोः -

**युष्मद्-शब्दस्य** युष्माक-आदेशः
**अस्मद्-शब्दस्य** अस्माक-आदेशः

युवयोः/ युष्माकम् अयम् = युष्माकः / यौष्माकीणः
आवयोः/ अस्माकम् अयम् = आस्माकः/ आस्माकीनः

छ-प्रत्यये **एकवचने** - त्वदीयः, मदीयः
छ-प्रत्यये **द्विबहुवचनयोः** - युष्मदीयः, अस्मदीयः

s2s